സമഗ്ര ചോദ്യോത്തരങ്ങൾ

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(4)*

**Quest:कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।**

क. गौतमबुद्धस्य जन्मान्तरानुभवाः कासु कथासु विद्यन्ते?

(हितोपदेशकथासु, जातककथासु, बृहत्कथासु, पञ्चतन्त्रकथासु)

ख. भर्त्रा इत्यस्य का विभक्तिः?

(तृतीया. चतुर्थी, पञ्चमी, षष्ठी)

ग. उत्थाप्य इति पदं कस्मिन् विभागे अन्तर्भवति?

(क्त्वान्ते, ल्यबन्ते, तुमुन्नन्ते, शत्रन्ते)

घ. तूष्णीम् इत्यस्य समानार्थकं पदं चित्वा लिखत।

(अत्यन्तं, शीघ्रं, मौनं, मन्दम्)

ङ. "भवत्याः भर्ता कुटिलचित्तः अस्ति, अतः निश्चयेन अहं नागच्छामि" - कस्याः वचनमिदम्?

(अजायाः, सुरभ्याः,पत्न्याः,जनन्याः)

**2) प्रदत्तं वाक्यं पठित्वा कस्य वचनम् इति विवेचयत ।**

क) प्रिये ! मम बान्धवाः सर्वे भवत्याः भर्त्रा मारिताः ।

( अजायाः , श्रृगालपत्न्याः , श्रृगालस्य , शुनकस्य )

ख) प्रिये ! तव शक्तिः अपारा एव ।

(अजायाः , श्रृगालस्य , श्रृगालपत्न्याः , शुनकस्य )

**Hint:**

क. जातककथासु।

ख. तृतीया।

ग. ल्यबन्ते।

घ. मौनम्।

ङ. अजायाः।

2 क) अजायाः ।

ख) श्रृगालपत्न्याः।

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(4)*

**Quest:**

**उदाहरणानुसारम् एकपदं लिखत।**

क) **कुटिलं चित्तं यस्य सः - कुटिलचित्तः**

स्वस्थं चित्तं यस्य सः -----------

ख) दिने दिने - प्रतिदिनम् ।

वारे वारे - -----------

ग) धैर्येण सह वर्त्तते - सधैर्यम् ।

कुटुम्बेन सह वर्त्तते - ------------

**Hint:** क) स्वस्थचित्तः।

ख) प्रतिवारम्।

ग) सकुटुम्बम्।

Chapter Name:किमसौ न भयङ्करः।                    *Marks :(3)*

Quest:

अधोदत्तं वाक्यं पठित्वा क्त्वान्त - ल्यबन्त - तुमुन्नन्तानि अव्ययानि चित्वा लिखत ।

"पत्न्या सह आगताम् अजां दृष्ट्वा श्रृगालः

शिरः उत्थाप्य तां ग्रहीतुं सन्नद्धोऽभवत् । "

Hint:

क्त्वान्तल्यबन्त

म्     म्     तुमुन्नन्तम्

दृष्ट्वा उत्थाप्यग्रहीतुं

Chapter Name:किमसौ न भयङ्करः।                    *Marks :(5)*

Quest:

सूचनाः उपयुज्य कथां विपुलीकुरुत ।

हिमालयसानुः ---------- वनाजाः -------- श्रृगालः ---------- बुद्धिमती अजा ----- श्रृगालगमनं -------- प्राणरक्षार्थं धावनम् --------श्रृगालपत्युः प्रयत्नः -------- मम मित्राणि --------- शुनकाः च -----------भोजनव्यवस्था ------------ तव भर्तुः जीवहानिः ----------------- ससुखमवसत् ।

Hint:

वाक्यघटना- 1

आशयव्यक्तता - 2

भाषाशुद्धिः -1

Chapter Name:**किमसौ न भयङ्करः।** *Marks :(5)*

Quest:

**प्रादेशिकभाषया विवर्तयत।**

श्रीबुद्धः तस्य जन्मान्तरानुभवान् कथारूपेण स्वशिष्यान् उपदिशति । तेषां समाहारः भवति जातककथा । एताः कथाः मानुषिकमूल्यान् वर्धयितुम् उपकुर्वन्ति । बोधिसत्वनाम्ना प्रसिद्धः श्रीबुद्धः पूर्वजन्मसु मनुष्यरूपैः जन्तुरूपैः च जीवितं निनाय इति श्रूयते। ।

Hint:

वाक्यघटना- 1

आशयव्यक्तता - 2

भाषाशुद्धिः -2

Chapter Name:**किमसौ न भयङ्करः।** *Marks :(4)*

Quest:

**उदाहरणानुसारं सन्धिं कुरुत ।**

क) कृत्वा + अपि - कृत्वापि ।

दत्वा + अपि - ----------।

ख) तत् + दृष्ट्वा - तद्दृष्ट्वा ।

तत् + दृश्यते - --------- ।

ग) पुनः + अपि - पुनरपि ।

कविः + अपि - -------- ।

घ) पतिं + च - पतिञ्च

मतिं + च - ---------- ।

**Hint:**

क) दत्वापि।

ख) तद्दृश्यते।

ग) कविरपि

घ) मतिञ्च

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(4)*

**Quest: यथोचितं योजयत ।**

जातककथा - विषम्

प्रतिदिनम् - क्त्वान्तम्

हलाहलम् - बौद्धधर्मसम्बद्धः

श्रुत्वा - दिने दिने

**Hint:**

जातककथा - बौद्धधर्मसम्बद्धः

प्रतिदिनम् - दिने दिने

हलाहलम् - विषम्

श्रुत्वा - क्त्वान्तम्

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(2)*

**Quest:**

**अधोदत्तं वाक्यं पठित्वा सम्बोधनरुपं चित्वा लिखत ।**

क) शुभे ! भोज्यव्यवस्थां सज्जीकृत्य आगमिष्यामि ।

ख) प्रिये ! मम बान्धवाः सर्वे भवत्याः भर्त्रा मारिताः ।

**Hint:**

क) शुभे !

ख) प्रिये !

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(4)*

**Quest:**

**कथासन्दर्भं पठित्वा सम्भाषणांशान् पूरयत ।**

शृगालदम्पत्योः उपायानुसारं मृतवदाचरतः श्रृगालस्य समीपम् अजा आगतवती । तदा शिरः उत्थाप्य ईक्षन्तं शृगालं सा अपश्यत् । सा प्राणरक्षार्थं पलायिता । अनन्तरं "भवत्याः शक्त्या एव मम भर्त्तुः प्राणाः प्रत्यागताः" इत्युक्त्वा पुनरपि शृगालपत्नी ताम् आनेतुं प्रयत्नम् अकरोत्।

शृगालपत्नी - भो ! भवत्याः ---- एव भर्त्ता अधुना जीवति ।

अजा - पुनः किमर्थं भवती आगता ?

शृगालपत्नी - भर्त्ता भवत्या सह -------- कर्तुम् इच्छति ।

अजा - नागच्छामि । भवतः ------ कुटिलमतिः एव ।

शृगालपत्नी - न तथा । सः इदानीं पश्चात्तापविवशः ।
अतः भवत्या साकं भाषणं कर्त्तुम् इच्छति ।

अजा - अहम् आगच्छामि । मया साकं सहस्रशुनकमित्राण्यपि स्युः ।

तेषां कृते भोजनव्यवस्था कार्या ।

शृगालपत्नी - -----सज्जीकृत्य आगमिष्यामि । पुनर्मिलावः ।

**Hint:**

**मातृका उत्तरम्**

शृगालपत्नी - भो ! भवत्याः शक्त्या एव भर्त्ता अधुना जीवति ।

अजा - पुनः किमर्थं भवती आगता ?

शृगालपत्नी - भर्त्ता भवत्या सह भाषणं कर्तुम् इच्छति ।

अजा - नागच्छामि । भवतः भर्ता कुटिलमतिः एव ।

शृगालपत्नी - न तथा । सः इदानीं पश्चात्तापविवशः ।

अतः भवत्या साकं भाषणं कर्त्तुम् इच्छति ।

अजा - अहम् आगच्छामि । मया साकं सहस्रशुनकमित्राण्यपि स्युः ।

तेषां कृते भोजनव्यवस्था कार्या ।

शृगालपत्नी - भोजनव्यवस्था सज्जीकृत्य आगमिष्यामि । पुनर्मिलावः ।

मूल्यनिर्णयसूचकः

उचितानां सम्भाषणांशानाम् एकैकोऽङ्कः।

**Chapter Name:किमसौ न भयङ्करः।** *Marks :(5)*

Quest:

**प्रदत्ताः सूचनाः पठित्वा शृगालेन प्रयुक्तम् उपायं कथारूपेण लिखत ।**

हिमालयस्य सानुप्रदेशः------- बुद्धिमती अजा ----- तस्याः वधः करणीयः ----- शृगालस्य उपायः ---------- गालपत्नी वदति ------ शृगालो मृतवदाचरति ----- अजा आगच्छति ------- शृगालं पश्यति ------ भीता पलायिता च----- शृगालस्य उपायः ।

Hint:

वाक्यघटना- 1

आशयव्यक्तता - 2

भाषाशुद्धिः -2